श्री सुब्रह्मण्य भुजंग प्रयात स्तोत्रं 2

श्री सुब्रह्मण्य भुजंग प्रयात स्तोत्रं 2

गणेशं नमस्कृत्य गौरीकुमारं
गजास्यं गुहस्याग्रजातं गभीरं |
प्रलंबोदरं शूर्पकर्णं त्रिणेत्रं
प्रवक्ष्ये भुजंगप्रयातं गुहस्य || 1 ||

पृथक्षट्किरीट स्फुरद्दिव्यरत्न-
-प्रभाक्षिप्तमार्तांडकोटिप्रकाशं |
चलत्कुंडलोद्यत्सुगंडस्थलांतं
महानर्घहारोज्ज्वलत्कंबुकंठं || 2 ||

शरत्पूर्णचंद्रप्रभाचारुवक्त्रं
विराजल्ललाटं कृपापूर्णनेत्रं |
लसद्भ्रूसुनासापुटं विद्रुमोष्ठं
सुदंतावळिं सुस्मितं प्रेमपूर्णं || 3 ||

द्विषड्बाहुदंडाग्रदेदीप्यमानं
क्वणत्कंकणालंकृतोदारहस्तं |
लसन्मुद्रिकारत्नराजत्कराग्रं
क्वणत्किंकिणीरम्यकांचीकलापं || 4 ||

विशालोदरं विस्फुरत्पूर्णकुक्षिं
कटौ स्वर्णसूत्रं तटिद्वर्णगात्रं |
सुलावण्यनाभीसरस्तीरराज-
-त्सुशैवालरोमावळीरोचमानं || 5 ||

सुकल्लोलवीचीवलीरोचमानं
लसन्मध्यसुस्निग्धवासो वसानं |
स्फुरच्चारुदिव्योरुजंघासुगुल्फं
विकस्वत्पदाब्जं नखेंदुप्रभाढ्यं || 6 ||

द्विषट्पंकजाक्षं महाशक्तियुक्तं
त्रिलोकप्रशस्तं सुशिक्के पुरस्थं |
प्रपन्नार्तिनाशं प्रसन्नं फणीशं
परब्रह्मरूपं प्रकाशं परेशं || 7 ||

कुमारं वरेण्यं शरण्यं सुपुण्यं
सुलावण्यपण्यं सुरेशानुवर्ण्यं |
लसत्पूर्णकारुण्यलक्ष्मीशगण्यं
सुकारुण्यमार्याग्रगण्यं नमामि || 8 ||

स्फुरद्रत्नपीठोपरि भ्राजमानं
हृदंभोजमध्ये महासन्निधानं |
समावृत्तजानुप्रभाशोभमानं
सुरैः सेव्यमानं भजे बर्हियानं || 9 ||

ज्वलच्चारुचामीकरादर्शपूर्णं
चलच्चामरच्छत्रचित्रध्वजाढ्यं |
सुवर्णामलांदोलिकामध्यसंस्थं
महाहींद्ररूपं भजे सुप्रतापं || 10 ||

धनुर्बाणचक्राभयं वज्रखेटं
त्रिशूलासिपाशांकुशाभीतिशंखं |
ज्वलत्कुक्कुटं प्रोल्लसद्द्वादशाक्षं
प्रशस्तायुधं षण्मुखं तं भजेऽहं || 11 ||

स्फुरच्चारुगंडं द्विषड्बाहुदंडं
श्रितामर्त्यषंडं सुसंपत्करंडं |
द्विषद्वंशखंडं सदा दानशौंडं
भवप्रेमपिंडं भजे सुप्रचंडं || 12 ||

सदा दीनपक्षं सुरद्विड्विपक्षं
सुमृष्टान्नभक्ष्यप्रदानैकदक्षं |
श्रितामर्त्यवृक्षं महादैत्यशिक्षं
बहुक्षीणपक्षं भजे द्वादशाक्षं || 13 ||

त्रिमूर्तिस्वरूपं त्रयीसत्कलापं
त्रिलोकाधिनाथं त्रिणेत्रात्मजातं |
त्रिशक्त्या प्रयुक्तं सुपुण्यप्रशस्तं
त्रिकालज्ञमिष्टार्थदं तं भजेऽहं || 14 ||

विराजद्भुजंगं विशालोत्तमांगं
विशुद्धात्मसंगं विवृद्धप्रसंगं |
विचिंत्यं शुभांगं विकृत्तासुरांगं
भवव्याधिभंगं भजे कुक्कलिंगं || 15 ||

गुह स्कंद गांगेय गौरीसुतेश-
-प्रिय क्रौंचभित्तारकारे सुरेश |
मयूरासनाशेषदोषप्रणाश
प्रसीद प्रसीद प्रभो चित्प्रकाश || 16 ||

लपन् देवसेनेश भूतेश शेष-
-स्वरूपाग्निभूः कार्तिकेयान्नदातः |
यदेत्थं स्मरिष्यामि भक्त्या भवंतं
तदा मे षडास्य प्रसीद प्रसीद || 17 ||

भुजे शौर्यधैर्यं करे दानधर्मः
कटाक्षेऽतिशांतिः षडास्येषु हास्यं |
हृदब्जे दया यस्य तं देवमन्यं
कुमारान्न जाने न जाने न जाने || 18 ||

महीनिर्जरेशान्महानृत्यतोषात्
विहंगाधिरूढाद्विलांतर्विगूढात् |
महेशात्मजातान्महाभोगिनाथा-
-द्गुहाद्दैवमन्यन्न मन्ये न मन्ये || 19 ||

सुरोत्तुंगशृंगारसंगीतपूर्ण-
-प्रसंगप्रियासंगसम्मोहनांग |
भुजंगेश भूतेश भृंगेश तुभ्यं
नमः कुक्कलिंगाय तस्मै नमस्ते || 20 ||

नमः कालकंठप्ररूढाय तस्मै
नमो नीलकंठाधिरूढाय तस्मै |
नमः प्रोल्लसच्चारुचूडाय तस्मै
नमो दिव्यरूपाय शांताय तस्मै || 21 ||

नमस्ते नमः पार्वतीनंदनाय
स्फुरच्चित्रबर्हीकृतस्यंदनाय |
नमश्चर्चितांगोज्ज्वलच्चंदनाय
प्रविच्छेदितप्राणभृद्बंधनाय || 22 ||

नमस्ते नमस्ते जगत्पावनात्त-
-स्वरूपाय तस्मै जगज्जीवनाय |
नमस्ते नमस्ते जगद्बंदिताय
ह्यरूपाय तस्मै जगन्मोहनाय || 23 ||

नमस्ते नमस्ते नमः क्रौंचभेत्त्रे
नमस्ते नमस्ते नमो विश्वकर्त्रे |
नमस्ते नमस्ते नमो विश्वगोप्त्रे
नमस्ते नमस्ते नमो विश्वहंत्रे || 24 ||

नमस्ते नमस्ते नमो विश्वभर्त्रे
नमस्ते नमस्ते नमो विश्वधात्रे |
नमस्ते नमस्ते नमो विश्वनेत्रे
नमस्ते नमस्ते नमो विश्वशास्त्रे || 25 ||

नमस्ते नमः शेषरूपाय तुभ्यं
नमस्ते नमो दिव्यचापाय तुभ्यं |
नमस्ते नमः सत्प्रतापाय तुभ्यं
नमस्ते नमः सत्कलापाय तुभ्यं || 26 ||

नमस्ते नमः सत्किरीटाय तुभ्यं
नमस्ते नमः स्वर्णपीठाय तुभ्यं |
नमस्ते नमः सल्ललाटाय तुभ्यं
नमस्ते नमो दिव्यरूपाय तुभ्यं || 27 ||

नमस्ते नमो लोकरक्षाय तुभ्यं
नमस्ते नमो दीनरक्षाय तुभ्यं |
नमस्ते नमो दैत्यशिक्षाय तुभ्यं
नमस्ते नमो द्वादशाक्षाय तुभ्यं || 28 ||

भुजंगाकृते त्वत्प्रियार्थं मयेदं
भुजंगप्रयातेन वृत्तेन क्लप्तं |
तव स्तोत्रमेतत्पवित्रं सुपुण्यं
परानंदसंदोहसंवर्धनाय || 29 ||

त्वदन्यत्परं दैवतं नाभिजाने
प्रभो पाहि संपूर्णदृष्ट्यानुगृह्य |
यथाशक्ति भक्त्या कृतं स्तोत्रमेकं
विभो मेऽपराधं क्षमस्वाखिलेश || 30 ||

इदं तारकारेर्गुणस्तोत्रराजं
पठंतस्त्रिकालं प्रपन्ना जना ये |
सुपुत्राष्टभोगानिह त्वेव भुक्त्वा
लभंते तदंते परं स्वर्गभोगं || 31 ||

इति श्री सुब्रह्मण्य भुजंग प्रयात स्तोत्रं |